Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 207 OLD 69

FOLIO 22

TITLE

1. शब्दबोधविचारः । 5 Copies
2. विकारवादार्थः । 3 Copies.

अथ प्रथमोंतर्मुखव्यवहारोप्यकस्मात्शुद्धबोधविचा
रः प्रारभ्यते.

श्रीगणेशायनमः ॥ धात्वर्थः प्रथमांतार्थः प्रधानमितिसंवादे ॥ श्रीमानचलशर्मासौ
किंचिद्वक्तुं व्यवस्थितः ॥ घटोनभवतीतिवाक्यात् प्रथमांतार्थमुख्यविशेष्यक बोधसम
र्थमिदं वाक्यमित्याकांक्षाप्रतिसंधानो मुख्यविशेष्यं प्रथमांतार्थं प्रत्येति ॥ क्रियामुख्य
विशेष्यक बोधसमर्थमिदंवाक्यमितियः प्रतिसंधत्तेसः प्रधानीभूतांक्रियामेवावगच्छती
तिसिद्धांतः ॥ अत्रैवैय्याकरणाः ॥ सर्वत्रक्रियाया एवप्राधान्यं नतुप्रथमांतार्थो मुख्यवि
शेष्यः ॥ वैपरीत्येतुचैत्रेणसुप्यतेइत्यादिक्रियायाः प्राधान्यस्यभवद्भ्युपगतस्यवि
निगमकस्यसत्वात् । ममतुनैकत्रापिप्रथमांतार्थस्यप्राधान्यंतदनुरोधेनान्यत्रापिस्या

दितिचेत् । त्रयःकालाइत्यत्रभवतोपिप्रथमांतार्थमुरव्यविशेष्यकत्वे तत्र क्रियासमभिव्याहा
राभावेन क्रियायाः प्राधान्य संभवात् । नवाध्याहारोपीश्वरेणज्ञायते इत्यस्य अस्ति भवति
परः प्रथमपुरुषे अप्रयुज्यमानोस्ति इत्यनेन भवति परोलट्स धातुरध्याहर्तव्य इत्य ध्याहा
रनियमात् अत्रसंतीतिनाध्याहारः । त्रयाणांकालानां अविधमानत्वात् । स्याद्वाकात्यायन
विरुधोप्य ध्याहारः ममापिचेत्रे पास्फ्यंतेइत्यत्रेवापिईश्वरे णज्ञायंते इत्य ध्याहारः किंपाणि
पिहितः यतः क्रियायाः प्राधान्य मभ्युगच्छेयं किंचास्मदोद्वयोश्चेतिद्वित्वे एकत्वे अस्मदोबहु
वचनंनियम्यते । तत्र पटवोवयंब्रूमः पटुर्वयंब्रूमः इत्यनयोर्वारणाय सविशेषणानां प्रति

षेध इति वार्तिकारंभः ॥ एवंचकेयूयंवयंमैथिला इतिप्रश्नोत्तरवाक्यस्थगच्छसिमथुरा
२ नगरीमिदमुत्धवइत्धभावमावेद्यं ॥ तवगुणविलिखनहेतोर्वयमिहकुब्जाकिमौदास्यमि
तिकविप्रणीतवाक्यस्यच सविशेषणत्वेन बहुवचनानुपपत्तेः क्रियायोग एव सविशेषणानांनि
षेध इतिसूत्रतात्पर्यमुन्नेयं ॥ तथाच वाक्योत्तरवाक्ययोः चयदिक्रियाध्याहारस्तदाबहुवच
नासाधुत्वंन चेत् अध्याहारस्वीकृतंक्रियाविनिर्मुक्तं वाक्यंन चक्रियाशब्दयोगेनबहुवचना
साधुत्वंनत्वर्थयोगेअत्रतु अर्थयोग एवकर्तव्य इतिवाच्यं ॥ अर्थाध्याहारस्यशातशोनिरस्तत्वा
त् ॥ यत्तुपस्यमृगोधावतीत्यत्रप्रथमांतार्थस्यप्राधान्येमृगपदोत्तरंद्वितीयापत्तिः क्रियायाःप्रा

धान्येनास्य प्रातिपदिकत्वाभावान्न द्वितीयापत्तिः ॥ दृशिक्रियायां धावनक्रियायाः कर्मतासंबंधेनान्वयात् न धावनक्रियाकर्मत्वे प्रकारेणेन द्वितीयापेक्षा स्यात् इति तन्न "पश्य मृगो धावतीत्यत्र तमित्यध्याहारेण सर्वसामंजस्यात् क्रियायाः कर्मत्वादिसंबंधेन परस्परमन्वयाभ्युपगमो निरर्थकः । एकक्रियाविशेष्यका परक्रियाप्रकारकबोधेऽयोच्चरितं वाक्यमसाध्वेव । नचपचतिभवतीति वाक्यस्याप्यसाधुत्वं स्यात् तस्यभाष्यप्रयोगादेव साधुत्वं । अत एवातिङ् तिङ् इतिसूत्रे तिङंतोत्तरं तिङंतं निहन्यत इत्यर्थात् तिङंतोत्तरतिङंतस्य निघातस्वरवारणायतिङि तिसार्थकं तदेवंस्यात् यदि तिङंतोत्तरं तिङंतं सव्यपेक्षं स्यात् समर्थाश्रितत्वात् पदविधेः ॥ तथाचपच

ति भवतीत्यादि निर्देशेन तयोः परस्पर व्यपेक्षाभ्युपगमेनभवती त्यस्य निघातस्वर वारण
यातिङ्सार्थकं । नतु गच्छतिभवती त्याधुनिकस्य साधुत्वं तथा ऽनिर्देशात्।। लौ
किक वावन्यक्रियायाः क्रियाकर्मभावेनान्वयबो धानभ्युपगमात् । अन्यथा पचतिभवतीत्या
दिवत् पचतिभूयतेचंदनसंयोगो नसुरवयती तिवत्चंदनेन संयुनक्ती तिदीपनाशाय गच्छती
तिवत्दीपंनश्यतितंतुनापटो नस्यतीतिवत् पटोनस्यतीतिस्यंदनयोगइतिवत् स्यंदनेन युनक्ती
तिसंयोगस्यनाशइतिवत् संयुनक्तिनस्यतीतिविभागेसति पूर्वसंयोगनाशइतिवत्संयु
नक्तिनस्यतीतिस्यात् । नहिमहाकवि प्रणीतवाक्यविसदृशानां काश्चित्प्रामाण्यमभ्युपैति।

यत्तुक्रियायाः परस्पर मन्वय विरहेणाप्रामाण्यमभ्युपपद्यते॥ स्याद्वा पचतिभवतिइत्यत्रभू धात्व
र्थ एव धात्वंतरार्थस्याविशेषणत्वं एवंचपश्यमृगो धा वती त्य त्रदृश धात्वर्थस्याविशेष
णत्वेन वाक्येकवाक्यतानसंभवतिकिंतुतमित्यादि पदाध्याहारेणा न्वय बो ध इतिभवतिवाक्ये
कवाक्यतातादृशार्थ धावन विशिष्टस्य कर्म तया न्वयबो धाभ्युपगमात् विशिष्टवाचक पदाभा
वान्नद्वितीया । नचनीलं घटमानयेत्यादौनीलादि पदोत्तरं द्वितीयानस्यात् ॥ विशिष्टस्य क
र्मणोवाचक पदाभावादितिवाच्यं ॥ नीलमानय घटमानयेत्येवबोधः । नतुविशिष्टकर्मका
नयन प्रतीतिः ॥नचमीमांसक मतानुप्रवेशः ॥ दार्शनिकानां स्वगोत्र कलहे किमायातितद्दर्श

नस्य॥ नचनीलोघटः पश्यतीत्यपिस्यात् इति वाच्यं । प्रत्येकं नीलादेः कर्मता पत्याद्वितीया दुर्वारैवविशिष्टस्य कर्मतायेत् पश्यलक्ष्मणपंपायांबकः परम धार्मिकः इत्यनेनतुल्ययोगक्षेमः स्याद्वा एकेनतिङं तेनवाक्यार्थबोधंजनयित्वा द्वितीयेनसंभूयवाक्यार्थोजन्यते तत्र द्वितीयांत स्यादितातंत्रं । अतएवघटंपश्यतीतिनप्रयोगः॥ तत्रप्रथमंतिङं तेनवाक्यार्थबोधजन नाभावात् । नीलोघटोनश्यतिपश्येतिजायत एवतिङंतेनप्रथमंबाक्यार्थबोधंजनयित्वापश्य तीतिसंभूयवाक्यार्थबोधजनने द्वितीयांतत्वानपेक्षणात् । प्रथमांतार्थसुख्यविशेष्यता कबोधजननेनकोपिदोषः॥किंचाश्वोगच्छत्यानयेत्यत्रानयनकर्मत्वंगमनस्यनसंभवतिकिं

त्व श्वस्यैवनचाश्वकर्मत्वमेवगमनादावुपचर्यत इतिवाच्यं ॥ प्रथमांतार्थस्यैव सुरव्यविशे
ष्यत्वेसंभवति उपचारस्यान्यायात् ॥ एवंच धावंतिमृगादृश्यंत इत्यत्र कर्मणो मृगस्यसंख्या
न्वय योग्यतया बहुवचनोपपत्तेः ॥ प्रधान धात्वर्थस्य कर्मत्वे तुतस्यसंख्यान्वय योग्यतयाब
हुवचनानुपपत्तेः । प्रथमांतार्थस्य सुरव्यविशेष्यत्वेबाधकाभावेसाधकाभाव इतिपरम गुरुत्वो
दशैतेराजमातंगास्तस्यैवेमेतुरंगमाइतिवाक्यस्या प्रामाण्यवारणायतच्छब्दस्य प्रधानपरा
मर्शकत्वानियमः एवंच यातिपुरुषस्तस्य पादयोरभिवादयेत्यत्रयेष्याकरणमतेतच्छब्देनपुरुष
परामर्शोनसंभवति अप्राधानत्वात्क्रियायाःपरामर्शयोग्यत्वापत्तिः । न्यायनयेपुरुषस्यप्राधा-

न्येनतस्य परामर्शोसर्व मव दा तं ॥ यत्तुपटोल पत्रंवातघ्नं मूलं तस्यक फा पह्मित्यत्र तच्छब्दे
न प्रकृत परामर्शोनस्यात् । एवंचत च्छब्दस्यनप्र धान परामर्श त्वनियम इति तन्नक न्यामिधु
नंचाष्टमीत्यादि ज्योतिषी वा धुनिकवैद्य शास्त्रेपि शतशो ऽपह्नवादर्शनात् वाब्द प्रामाण्यान
भ्युपगमादितिप्राहुः । अत्रेदं प्रतिभाति । द्वोभनागंजा तांपिब अत्र गंजाशब्दा र्थोमदिरा
रूढ । एकदेशी भूतमदिरायाःतच्छब्देनपरामर्शात् एतद्वाक्यस्य योग्यता पत्तिः । अतः पदवृत्ति
ग्रहसुख्य विशेष्य परामर्शः तच्छब्दस्य ॥ मदिरा तुन गंजापद वृत्तिग्रहविशेष्येतिनतदात
स्य परामर्श इति । दशैतेराजमातंगास्तस्यैवा मी तुरंगमा इत्यादौ राजानराजमातंगा इतिस

समुदायवृत्तिग्रहविशेष्यः । अवयवशक्तिवादेऽत्यविशेषणत्वे सति पदवृत्तिसुरव्यविशेष्यो यः तत्परामर्शकत्वं तच्छब्दस्य एवंचराज्ञः पदवृत्तिसुरव्यविशेष्यत्वे पिराज मातंगाइति समासवृत्तिविशेषणत्वात् तच्छब्देनराज्ञः परामर्श इति नदोषः । एतेनतच्छब्दस्यप्रधानमात्रपरामर्शकत्वे अपएवससर्जादौतासुवीर्यमवासृजदित्यादौ पूर्ववाक्यार्थकर्मीभूतानामपांतच्छब्देननपरामर्शः स्यादितिदूषणंनिरस्तमितिदिक्कंकिंचक्रियायाःप्राधान्येनतत्रापिकिमानंनहिकर्तृव्यापारव्यातानामध्येभावस्य प्राधान्यबोधकंभावप्रधानमाख्यातमिति॥भावः धात्वर्थःप्रधानंयस्याख्यातार्थस्येत्यर्थकरणात्किंचभवतुवा प्रथमांतार्थसमभिव्याहारस्थलेभावप्राधान्यबोधकमुक्त

वाक्यं अत एव पुत्रमिच्छतीत्यत्रैव पुत्रइष्यत इत्यर्थे क्यच् नभवतीति भाष्यादेव क्यजो निषेध क भाष्यकारस्यअर्थभेदादिति युक्त्यनुसरणानुपपत्तेः किंत्वर्थभेदादितियुक्त्या निषिध्यते । अर्थभेदःप्रथमांतार्थप्राधान्य एवोपपद्यते ॥ तथाहिकर्तृप्रत्ययस्थले फलस्य व्यापार विशेषत्वे प्रथमांतार्थस्य विशेषत्वोपपत्तिः । नान्यथाकर्तृप्रत्ययस्थले व्यापारस्य फलविशेषणत्व एव प्रथमांतार्थो मुख्यविशेष्यो नतुफलस्य व्यापार विशेषणत्वइति । पुत्रइष्यते पुत्रं इच्छतीत्यनयोरर्थभेद इतिभवति प्रथमांतार्थ मुख्यविशेष्यकबोधे ज्ञापकः भाष्यप्रयोगइ संक्षेपः ॥ ७ ॥ इतिश्रीमदचलशर्म निर्मित प्रथमांतार्थ मुख्यविशेष्यक शाब्दबोध

प्रकरणं श्रीमत्जगद्गुरु शृंगेरी शंकराचार्यशालाव्यवस्थापक गुरुनाथशर्मणा फाट
कोपनाम धारिणा संशोध्य यत्तच्छालाध्यापकेन शोधयित्वा धारवाड वृत्तयंत्रालये
मुद्रितं ॥ श्रीशके १८१० सर्वधारी नाम परिवत्सरे पुष्यशुद्ध ४

॥ श्रीमदचलशर्मनिर्मितप्रथमांतमुख्यविशेष्यकशाब्दबोधविचारः समाप्तोयम् ॥